ज्ञा 10 U. नियोगे to direct; ज्ञापयति-ते pre. ज्ञापयाञ्चकार–चक्रे perf. ज्ञापयिता p fut. ज्ञापयिष्यति-ते fut. Pass—ज्ञाप्यते. ज्ञापित p.p.

ज्या 9 P. वयोहानौ to become old; जिनाति pre. जिज्यौ perf. ज्याता p. fut. ज्यास्यति fut. अज्यास्यत् con. अज्यासीत् aor. जीयात् ben. जिज्यासति des. Pass.–जीयते, अज्यायि aor. Cau.–ज्यापयति-ते pre. जीन p.p. जीत्वा ger.

ज्यु 1 A. to go; ज्यवते pre. जुज्युवे perf. ज्योता p. fut. अज्योष्ट aor.

ज्रि 1 P. जये अभिभवे च to conquer, to defeat. ज्रयति pre. जिज्राय perf. ज्रेता p. fut. अज्रैषीत् aor.

ज्रि 10 U. वयोहानौ to become old; ज्राययति-ते pre. ज्राययाञ्चकार–चक्रे &c. perf. ज्राययिता p. fut. अजिज्रयत–त aor.

ज्वर् 1 P. रोगे to be hot with fever or passion; ज्वरति pre. जज्वार perf. ज्वरिता p. fut. ज्वरिष्यति fut. अज्वारीत्. aor. Cau – ज्वरयति-ते, अजिज्वरत्-त aor. जिज्वरिषति des. जूर्ण p. p.

ज्वल् 1 P. दीप्तौ to burn, to glow; ज्वलति pre. जज्वाल perf. ज्वलिता p. fut. ज्वलिष्यति fut. अज्वालीत् aor. Cau.–ज्वलयति-ते, ज्वालयति-ते (with प्र-प्रज्वलयति-ते) pre. जिज्वलिषति des. ज्वलित p. p.

झ—

झट् 1 P. संघाते to be collected or matted together; झटति pre. अझटीत्, अझाटीत् Aor.

झम् 1 P. अदने to eat; झमति pre. झमिता p. fut. अझमीत् Aor.

झष् 1 P. हिंसायाम् to kill; झषति pre. जझाष perf. झषिता p. fut. अझषीत्, अझाषीत् aor.

झष 1 U. आदानसंवरणयोः to take, to put on, to conceal; झषति-ते pre. जझाष, जझषे perf. झषिता p. fut. अझषीत्, अझाषीत्, अझषिष्ट aor.

झॄ 4. 9. P. वयोहानौ to become old; झीर्यति, झृणाति pre. जझार perf. झरिता, झरीता p. fut. अझारीत् Aor.

ट—

टङ्क् 1 P. 10 U. to bind, to tie; टङ्कति, टङ्कयति-ते pre. टटङ्क, टङ्कयाञ्चकार-चक्रे &c. perf. टङ्किता, टङ्कयिता p. fut. अटङ्कीत् अटटङ्कत्-त aor. टङ्कित p. p.

टल् 1. P. वैक्लव्ये to be confused; टलति pre. टटाल perf. टलिता fut. अटालीत् aor.

टिक् 1 A. to go, to move; टेकते pre. टिटिके perf. टेकिता p. fut. अटेकिष्ट aor. Cau.–टेकयति–ते pre. अटिटेकत्-त aor.

टिप् 10 U. क्षेपे to throw, to send; टेपयति–ते pre. टेपयाञ्चकार-चक्रे perf. टेपयिता p. fut. अटिटेपत्-त aor.

टीक् 1 A. to go, to move; टीकते pre. टिटीके perf. टीकिता p. fut. अटीकिष्ट aor. टिटीकिषते des.

टौकृ 1. A. to go, टौकते pre. अटौकिष्ट Aor.

ड—

डप् 10 A. संघाते to gather, to heap; डापयते pre. डापयाञ्चक्रे perf. डापयिता p. fut. अडीडपते aor.

डम्ब् 10 A. क्षेपे to throw, to send; डम्बयति-ते pre. डम्बयाञ्चकार-चक्रे, perf. डम्बयिता p. fut. डम्बयिष्यति-ते fut. अडडम्बत्-त Aor.

डिप् 4 P. क्षेपे to throw; डिप्यति pre. डिडेप perf. डेपिता p. fut. अडिपत् aor.

डिप् 10 A. संघाते to gather; डेपयते pre. डेपयाञ्चक्रे perf. डेपयिता p. fut. अडीडिपत aor.

डी 1 A. विहायसा गतौ to fly, to go; डयते pre. डिड्ये perf. डयिता p. fut. डयिष्यते fut. अडयिष्ट aor. डयिषीष्ट Ben. Cau.—डाययति-ते, अडीडयत्-त Aor. डिडयिषते des. डयित, डान (with उत) p. p.

डी 4 A. to fly, to go; डीयते pre. डिड्ये perf. डीन p. p. For other forms see 1 A.

डुल् 10 U. to throw up; डोलयति-ते pre. डोलयाञ्चकार-चक्रे perf. डोलयिता p. fut. अडूडुलत्-त aor.

ढ—

ढौकृ 1 A. गतौ to go, to approach; ढौकते pre. डुढौके perf. ढौकिता p. fut. ढौकिष्यते fut. अढौकिष्ट aor. ढौकिषीष्ट Ben. Cau.—ढौकयति-ते pre. अडुढौकत्-त aor. डुढौकिषते des. Pass.—ढौक्यते. ढौकित p. p.

त—

तकृ 1 P. हसने सहने च to laugh, to bear; तकति pre. तताक perf. तकिता p. fut. अतकीत्, अताकीत् aor. तकित p. p.

तक्ष् 1 P. त्वचने (त्वचनं संवरणं त्वचोमर्दनं च) to conceal, to pare; तक्षति pre. ततक्ष perf. तक्षिता p. fut. अतक्षीत् Aor.

तक्ष् 1 P. तनूकरणे to pare, to cut; तक्षति, तक्ष्णोति pre. (belongs to 5th conj. optionally in the Conj. Tenses) ततक्ष perf. तक्षिता p. fut. तक्षिष्यति, तक्ष्यति fut. अतक्षीत् aor. तक्ष्यात् ben. तष्ट p. p. तक्षिता, तष्ट्वा ger.

तङ्ग् 1 P. गतौ स्खलने कम्पने च to go, to stumble, to shake; तङ्गति pre. ततङ्ग perf. तङ्गिता p. fut. अतङ्गीत् aor. तङ्गित p. p.

तञ्च् 1 P. to go; तञ्चति pre. ततञ्च perf. तञ्चिता p. fut. अतञ्चीत् aor. तक्त p. p. तञ्चित्वा, तक्त्वा ger.

तञ्च् 7 P. संकोचने to contract, to shrink; तनक्ति pre. ततञ्च perf. तंक्ता, तञ्चिता p. fut. तङ्क्ष्यति, तञ्चिष्यति fut; अतञ्चीत्, अताङ्क्षीत् Aor. Cau.–तञ्चयति-ते, तितञ्चिषति, तितङ्क्षति des.

तञ्ज् same as तञ्च्.

तट् 1 P. उच्छ्राये to grow; तटति pre. तताट perf. तटिता p. fut. अतटीत्, अताटीत् aor.

तड् 10 U. आघाते भाषायां च to beat; ताडयति-ते pre. ताडयाञ्चकार–चक्रे &c. perf. ताडयिता p. fut. ताडयिष्यति-ते fut. अतीतडत्-त aor. Pass.—ताड्यते pre. ताडित p. p.

तण्ड् 1 A. ताडने to beat; तण्डते pre. ततण्डे perf. तण्डिता p. fut. अतण्डिष्ट aor.

तन् 8 U. विस्तारे to spread, to go; तनोति, तनुते pre. ततान, तेने perf. तनिता p. fut. तनिष्यति-ते fut. अतनीत्, अतानीत् & अतनिष्ट, अतत aor. तन्यात् & तनिषीष्ट ben. तितांसति-ते, तितंसति-ते, तितनिषति-ते des. Pass.—तन्यते & तायते pre. अतानि aor. Cau.—तानयति-ते pre. अतीतनत्-त aor. तत p. p. तनित्वा, तत्वा ger.

तन् 1 P. 10. U. श्रद्धोपकरणयोः to believe, to subserve; तनति, तानयति-ते pre. अतनीत्, अतानीत्, अतीतनत्-त Aor.

तन्त्र् 10 A. कुटुम्बधारणे to support, to govern; तन्त्रयते pre तन्त्रयाञ्चक्रे perf. अततन्त्रत Aor. तितन्त्रयिषते des. Pass–तन्त्र्यते.

तप् 1 P. सन्तापे to shine, to heat; तपति pre. तताप, perf. तप्ता

p. fut. अताप्सीत् aor. तप्यात् ben. तितप्सति des. Pass.—तप्यते pre. अतप्त aor. Cau.—तापयति-ते pre. अतीतपत्-त aor. तप्त p. p.

तप् 4 A. ऐश्वर्ये to rule, to be powerful; तप्यते pre. तेपे perf. तप्ता p. fut. तप्स्यते fut. अतप्स्यत con. अतप्त aor. तप्सीष्ट ben. तप्त p. p.

तप् 10 U. to heat; तापयति-ते pre. तापयाञ्चकार-चक्रे &c. perf. तापयिता p. fut. अतीतपत्-त aor.

तम् 4 P. कांक्षायां खेदे च to be anxious, to be fatigued; ताम्यति pre. ततास perf. तमिता p. fut. तमिष्यति fut. अतमिष्यत् con. अतमत् aor. तान्त p. p. तमित्वा & तन्त्वा ger.

तय् 1 A. to go तयते pre. तेये perf. तयिता p. fut. अतयिष्ट aor.

तर्क् 10 U. वितर्के to guess, to suppose. तर्कयति-ते fut. तर्कयाञ्चकार-चक्रे, &c. perf. तर्कयिता p. fut. तर्कयिष्यति-ते fut. अतर्कयिष्यत्-त con. अततर्कत्-त aor. तर्कित p. p. तर्कयित्वा ger.

तर्ज् 1 P. भर्त्सने to threaten, to menace; तर्जति pre. ततर्ज perf. तर्जिता p. fut. तर्जिष्यति fut. अतर्जिष्यत् con. अतर्जीत् aor. तितर्जिषति des. तर्जित p. p.

तर्ज् 10 A. भर्त्सने to blame; तर्जयते pre. तर्जयाञ्चक्रे perf. तर्जयिता p. fut. अततर्जत aor. तर्जित p. p.

तर्द् 1 P. हिंसायां to kill, to hurt; तर्दति pre. ततर्द perf. तर्दिता p. fut. अतर्दीत् aor.

तल् 10 U. प्रतिष्ठायां to establish; तालयति-ते.

तस् 4 P. उपक्षये to be decreased; तस्यति pre. अतसत् Aor.

तंस् 1 P &. 10 U. अलंकरणे to decorate, to assume; तंसति & तंसयति-ते pre. ततंस, तंसयाञ्चकार-चक्रे perf. तंसिता, तंसयिता p. fut. अतंसीत् & अततंसत्-त aor.

ताय् 1 A. संतानपालनयोः to spread, to protect; तायते pre. तताये perf. तायिता p. fut. आतयिष्ट, अतायि aor. Cau.—ताययति-ते pre. अततायत्-त aor. तितायिषते des.

तिक् 1 A. to go; तेकते pre. तेकिता p. fut. अतेकिष्ट aor.

तिक् 5 P. आस्कन्दने वधे च to attack; तिक्नोति pre. तितेक perf, तेकिता p. fut. अतेकीत् aor.

तिग 5 P. to attack; तिग्नोति pre. तितेग perf. तेगिता p. fut. अतेगीत् aor.

तिघ् 5 P. हिंसायां to hurt; तिघ्नोति pre. तितेघ perf. तेघिता p. fut. अतेघीत् aor.

तिज् 1 A. क्षमायां च to endure, to suffer with courage; तितिक्षते pre. तितिक्षाञ्चक्रे perf. तितिक्षिता p. fut. तितिक्षिष्यते fut. अतितिक्षिष्ट aor. तितिक्षिषीष्ट ben. तितिक्षिषते des. Cau.–तितिक्षयति-ते. When it means to sharpen (निशाने) तेजते pre. तेजिष्यते fut. अतेजिष्ट aor.

तिज् 10 U. निशाने to whet; तेजयति-ते pre. तेजयाञ्चकार-चक्रे perf. तेजयिता p. fut. अतीतिजत्-त aor.

तिप् 1 A. क्षरणे to drop down, to sprinkle; तेपते pre. तितिपे perf. तेप्ता p. fut. तेप्स्यते fut. अतेप्स्यत con. तिप्सीष्ट ben. अतिप्त aor.

तिम् 4 P. आर्द्रीभावे to be wet; तिम्यति pre. तितेम perf. तेमिता p. fut. अतेमीत् aor. तितिमिषति, तितेमिषति des. तिमित p. p.

तिल् 1 P. गतौ to go; तेलति pre. तितेल perf. तेलिता p. fut. अतेलीत् aor.

तिल् 6 P. & 10 U. to be oily or unctuous; तिलति, तेलयति–ते pre. तितेल, तेलयाञ्चकार-चक्रे &c. perf. तेलिता, तेलयिता p. fut. अतेलीत्, अतीतिलत्–त aor.

तिल्ल् 1 P. to go; तिल्लति pre. अतिल्लीत् Aor.

तीक् I A. to go; तीकते pre. तितीके perf. तीकिता p. fut. अतीकिष्ट aor.

तीम् 4 P. क्लेदने to be wet; तीम्यति pre. अतीमीत् Aor.

तीव् 1 P. स्थौल्ये to be fat. तीवति pre. तितीव perf. तीविता p. fut.. अतीवीत् Aor

तु 2 P. गतिवृद्धिहिंसासु to go, to grow, to kill; तौति, तवीति pre. तुताव perf. तोता p. fut. तोष्यति fut. अतोष्यत् con. अतौषीत् aor.

तुज् 1 P. हिंसायाम् to kill, to hurt; तोजति pre. तुतोज perf. तोजिता p. fut. अतोजीत् aor.

तुञ्ज् 1 P. प्रापणे हिंसायां बले च to reach, to kill, to be powerful; तुञ्जति pre. तुतुञ्ज perf. तुञ्जिता p. fut. अतुञ्जीत् aor.

तुज्, तुञ्ज् 10 U. हिंसाबलादाननिकेतनेषु to kill, to be strong, to live; तोजयति-ते, तुञ्जयति-ते pre. तोजयाञ्चकार-चक्रे. &c. तुञ्जयाञ्चकार-चक्रे, &c. perf. तोजयिता, तुञ्जयिता p. fut. अतूतुजत्-त, अतुतुञ्जत्-त aor.

तुट् 6 P. कलहकर्मणि (कुटादि) to quarrel, to cut; तुटति pre. तुतोट perf. तुटिता p. fut. अतुटीत् aor.

तुड् 1, 6 (कुटादि) P. तोडने to tear, to kill; तोडति, तुडति pre. तोडिता, तुडिता fut. अतोडीत्, अतुडीत् Aor.

तुड्ड् 1 P. अनादरे to mortify; तुड्डति pre. अतुड्डीत् Aor.

तुण् 6 P. कौटिल्ये to curve; तुणति pre. तुतोण perf. तोणिता p. fut. अतोणीत् aor.

तुत्थ् 10 U. आवरणे to cover; तुत्थयति-ते pre. अतुतुत्थत्-त Aor.

तुद् 6 U. व्यथने to strike, to wound; तुदति-ते pre. तुतोद, तुतुदे perf. तोत्ता p. fut. तोत्स्यति-ते fut. अतोत्स्यत्-त con. अतौत्सीत् & अतुत्त aor. तुद्यात्-तोत्सीष्ट ben. तुतुत्सति-ते des. Pass.-तुद्यते pre. अतोदि aor. Cau.-तोदयति-ते pre. अतूतुदत्-त aor. तुन्न p. p. तुत्त्वा ger.

तुन्द् 1 P. to search; तुन्दन्ति pre. तुतुन्द perf. तुन्दिता p. fut. अतुन्दीत् aor.

तुप् 1 & 6 P. हिंसायां to kill; तोपति, तुपति pre. तुतोप perf. तोपिता p. fut. अतोपीत् aor.

तुफ् 1, 6 P. हिंसायां to kill; see the above root; तोफते &c.

तुभ् 1 A. हिंसायां to kill; तोभते pre. अतुभत, अतोभिष्ट Aor.

तुभ् 4 & 9 P. to hurt, to kill; तुभ्यति, तुभ्नाति pre. तुतोभ perf. तोभिता p. fut. अतुभत् (4) अतोभीत् (9) aor.

तुम्प्, तुम्फ्, 1, 6. (See तुप्, तुफ् above); तुम्पति, तुम्फति pre.

तुम्ब् 1 P. अर्दने to hurt, to give pain; तुम्बति pre. अतुम्बीत् Aor. Also 10 U. अदर्शने च.

तुर् 3 P. त्वरणे to make haste; तुतोर्ति pre. तुतोर perf. तोरिता p. fut. अतोरीत् aor. (Vedic)

तुर्व् 1 P. हिंसायाम् to kill, to hurt; तुर्वति pre. तुतूर्व perf. तूर्विता p. fut. अतूर्वीत् aor.

तुल् 10 U. उन्माने to weigh, to examine; तोलयति-ते pre. तोलयाञ्च-कार-चक्रे perf. तोलयिता p. fut. तोलयिष्यति-ते fut. तोल्यात्, तोलयिषीष्ट Ben. अतूतुलत्-त aor. Pass.—तोल्यते pre. अतोलीत् Aor. तोलित p. p.

तुष् 4 P. तुष्टौ to be pleased or satisfied; तुष्यति pre. तुतोष perf. तोष्टा p. fut. तोक्ष्यति fut. अतोक्ष्यत् con. तुष्यात् ben. अतुषत् aor. Cau.—तोषयति-ते pre. अतूतुषत्-त aor. तुतुक्षति des. Pass.—तुष्यते pre. अतोषि aor. तुष्ट p. p. तुष्ट्वा ger. तोष्टुम् inf.

तुस् 1 P. to sound; तोसति pre. तुतोस perf. तोसिता p. fut अतोसीत् aor.

तुह् 1 P. अर्दने वधे च to torment, to kill; तोहति pre. अतुहत, अतोहीत् Aor. तुतु-तो-हिषति des.

तूण् 10 A. पूरणे to fill up; तूणयते pre. अतुतूणत Aor.

तूर् 4 A. गतित्वरणहिंसयोः to go hastily, to kill; तूर्यते pre. तुतूरे perf. तूरिता p. fut. अतूरिष्ट aor. तुतूरिषते des.

तूल् 1 P. निष्कर्षे to determine the quantity or weight of; तूलति pre. तूलिष्यति fut. अतूलीत् aor.

तृक्ष् 1 P. to go; तृक्षति pre. ततृक्ष perf. तृक्षिता p. fut. अतृक्षीत् aor. तृक्ष्यात् ben.

तृण् 8 U. अदने to eat; तर्णोति, तर्णुते, तृणोति-तृणुते pre. ततर्ण, ततृणे perf. तर्णिता p. fut. तर्णिष्यति-ते fut. अतर्णीत् अतर्णिष्ट, अतृत aor. तितर्णिषति-ते des. तृत p. p. तृणित्वा, तृत्वा ger.

तृद् 7 U. हिंसानादरयोः to destroy, to disregard; तृणत्ति, तृन्ते pre. ततर्द, ततृदे perf. तर्दिता p. fut. तर्दिष्यति-ते, तर्त्स्यति-ते fut. अतर्दिष्यत्-त con. अतृदत्, अतर्दीत्, अतर्दिष्ट aor. तृद्यात्, तर्दिषीष्ट, तृत्सीष्ट ben. तितर्दिषति, तितृत्सति des. तृण्ण p. p. तर्दित्वा, तृत्त्वा ger.

तृप् 4 P. तृप्तौ to become satisfied; तृप्यति pre. ततर्प perf. तर्पिता, तर्प्ता, त्रप्ता p. fut. तर्पिष्यति, तर्प्स्यति, त्रप्स्यति fut. अतर्पिष्यत्, अतर्प्स्यत्, अत्रप्स्यत् con. अतृपत्, अतर्पीत्, अत्राप्सीत्, अतार्प्सीत् aor. तृप्यात् ben. तितर्पिषति, तितृप्सति des. Cau.-तर्पयति-ते, अततर्पत्-त, अतीतृपत्-त aor. तृप्त p. p. तर्पितुम्, तर्प्तुम् त्रप्तुम् inf.

तृप् 5 P. प्रीणने to be pleased, to please; तृप्नोति pre. ततर्प perf. तर्पिता p. fut. अतर्पीत् aor. तृप्यात् ben. तितर्पिषति, तितृप्सति des. तर्पित p. p. तर्पित्वा ger.

तृप् 6 P. to be pleased, to please; तृपति pre. (for other forms see above).

तृप् 1 P. & 10 U. तृप्तौ संदीपने च to be satisfied, to light, to kindle; तर्पति, तर्पयति-ते pre. ततर्प, तर्पयाञ्चकार-चक्रे, &c. perf. तर्पिता, तर्पयिता p. fut. अतर्पीत्, अततर्पत्-त अतीतृपत्-त aor. तृपित, तर्पित p. p.

तृफ्, तृम्फ् 6 P. प्रीणने; to please; तृफति, तृम्फति pre. अतर्फीत्-अतृम्फीत् aor.

तृम्प् 9 P. प्रीणने to please; तृम्पति pre. तृम्पिष्यति fut. अतृम्पीत् aor.

तृष् 4 P. पिपासायाम् to be thirsty; तृष्यति pre. ततर्ष perf. तर्षिता p fut. तर्षिष्यति fut. अतर्षिष्यत् con. अतृषत् aor. तृष्यात् ben. Cau.—तर्षयति-ते pre. अतीतृषत्-त अततर्षत्-त aor. तितर्षिषति des. तृष्ट p. p. तृषित्वा, तर्षित्वा ger.

तृह् 6 P. हिंसायां to kill, to hurt; तृहति pre. ततर्ह perf. तर्हिता; तर्ढा, p. fut. तर्हिष्यति, तर्क्ष्यति fut. अतर्हीत्, अतृक्षत् aor. तितर्हिषति, तितृक्षति des. Cau. (see the next root). तृढ p. p. तर्हित्वा तृढ्वा ger.

तृह् 7 P. to injure, to kill; तृणेढि pre. ततर्ह perf. तर्हिता p. fut. तर्हिष्यति fut. अतर्हिष्यत् con. अतर्हीत् aor. तृह्यात् ben. तितृक्षति des.

Cau.—तर्हयति-ते pre. अततर्हत्-त अतीतृहत्-त aor. Pass.,—तृह्यते pre. अतर्हि aor. तृहित p. p. तर्हित्वा ger. तर्हितुम् inf.

तृंह 6 P. to kill; तृंहति pre. ततृंह perf. तृंहिता, तृंढा p. fut. तृंहिष्यति तृंक्ष्यति fut. अतृंहीत्, अतार्ङ्क्षीत् aor. तृंह्यात् ben. तितृक्षति, तितृंहिषति des. तृंहितुम्, तृण्ढुम् inf.

तॄ 1 P. प्लवनतरणयोः to cross over, to swim; तरति pre. ततार perf. तरिता, तरीता p. fut. तरिष्यति, तरीष्यति fut. अतारीत् aor. तीर्यात् ben. तितीर्षति, तितरिषति, तितरीषति des. तीर्ण p.p. तीर्त्वा ger. Pass.—तीर्यते pre. तेरे perf. तारिता, तरिता & तरीता p. fut. अतारि aor. तारिषीष्ट, तरिषीष्ट, & तीर्षीष्ट ben. Cau.—तारयति-ते pre. अतीतरत्-त Aor.

तेज् 1 P. निशाने पालने च to whet, to protect! तेजति pre. तितेज perf. तेजिता p. fut. अतेजीत् aor.

तेप् 1 A. क्षरणे कम्पे च्युतौ च to drop down, to shake; तेपते pre. तितेपे perf. तेपिता p. fut. अतेपिष्ट Aor.

तेव् 1 A. देवने to play; तेवते pre. अतेविष्ट Aor.

त्यज् 1 P. हानौ to abandon; त्यजति pre. तत्याज perf. त्यक्ता p. fut. त्यक्ष्यति fut. अत्यक्ष्यत् con. अत्याक्षीत् aor. त्यज्यात् ben. Cau.—त्याजयति-ते pre. अतित्यजत्-त aor. तित्यक्षति des. Pass.—त्यज्यते pre. अत्याजि aor. त्यक्त p. p. त्यक्त्वा ger. त्यक्तुम् inf.

त्रङ्क् 1 A. to go; त्रङ्कते pre. तत्रङ्के perf. त्रङ्किता p. fut. अत्रङ्किष्ट aor.

त्रख्, त्रंख् 1 P. to go; त्रखति, त्रङ्खति pre. तत्राख, तत्रङ्ख perf. त्रखिता-त्रङ्खिता p. fut. अत्रखीत्, अत्राखीत् & अत्रङ्खीत् aor.

त्रङ्ग् 1 P. to move; त्रङ्गति pre. तत्रङ्ग pref. त्रङ्गिता p. fut. अत्रङ्गीत् aor.

त्रप् 1 A. लज्जायां to be ashamed; त्रपते pre. त्रेपे perf. त्रपिता, त्रप्ता p. fut. त्रपिष्यते, त्रप्स्यते fut. अत्रपिष्यत, अत्रप्स्यत con. अत्रपिष्ट, अत्रप्त aor. त्रपिषीष्ट, त्रप्सीष्ट ben. Cau.—त्रपयति-ते pre. अतित्रपत्-त aor. तित्रपिषते des. त्रप्त p. p. त्रपित्वा, त्रप्त्वा ger. त्रपितुम्, त्रप्तुम् inf.

त्रस् 1 & 4 P. उद्वेगे to tremble, to fear; त्रसति, त्रस्यति pre. तत्रास perf. त्रसिता p. fut. त्रसिष्यति fut. अत्रसिष्यत् con. अत्रासीत्, अत्रसीत् aor त्रस्यात् ben. Pass.—त्रस्यते pre. अत्रासि aor. Cau.—त्रासयति-ते pre. अतित्रसत्-त aor. तित्रसिषति des. त्रस्त p. p. त्रसित्वा ger. त्रसितुम् inf.

त्रस् 10 U. ग्रहणे धारणे वारणे च to take, to hold, to oppose; त्रासयति-ते pre. त्रासयाञ्चकार-चक्रे &c. perf. त्रासयिता p. fut. अतित्रसत् त aor.

त्रंस् 1 P. 10 U. भाषायां to speak; त्रंसति, त्रंसयति-ते pre. अत्रंसीत्, अतत्रंसत्-त Aor.

त्रिङ्ख् 1 P. to go; त्रिङ्खति pre. तित्रिङ्ख perf. त्रिङ्खिता p. fut. अत्रिङ्खीत् aor.

त्रुट् 6 P. छेदने (कुटादि) to tear, to break; त्रुट्यति pre. तुत्रोट perf. त्रुटिता p. fut. त्रुटिष्यति fut. अत्रुटीत् aor. त्रुट्यात् ben. Cau.—त्रोटयति-ते pre. अतुत्रुटत्-त aor. तुत्रुटिषति des. Pass.—त्रुट्यते pre. अत्रोटि aor. त्रुटित p.p. त्रुटित्वा ger.

त्रुट् 10 A. छेदने to tear; त्रोटयते pre. त्रोटयाञ्चक्रे perf. त्रोटयिता p. fut. अतुत्रुटत aor. त्रोटयिषीष्ट ben.

त्रुप्, त्रुम्प् 1 P. हिंसायां to kill; त्रोपति, त्रुम्पति pre. अत्रोपीत्, अत्रुम्पीत् Aor.

त्रुफ् त्रुम्फ् Same as above.

त्रै 1 A. पालने to protect; त्रायते pre. तत्रे perf. त्राता p. fut. त्रास्यते fut. अत्रास्यत con. अत्रास्त aor. त्रासीष्ट ben. Cau.—त्रापयति-ते pre. अतित्रपत्-त aor. तित्रासते des. Pass.—त्रायते pre. अत्रायि aor. त्रात (त्राण) p.p. त्रातुम् inf.

त्रौक् 1 A. to go; त्रौकते pre. तुत्रौके perf. त्रौकिता p. fut. त्रौकिष्यते fut. अत्रौकिष्ट aor.

त्वक्ष् 1 P. तनूकरणे to pare; त्वक्षति pre. तत्वक्ष perf. त्वक्षिता, त्वष्टा p. fut त्वक्षिष्यति, त्वक्ष्यति fut. अत्वक्षीत्-अत्वाक्षीत् aor. त्वक्ष्यात् ben. तित्वक्षिषति, तित्वक्षति des. त्वष्ट p.p. त्वक्षित्वा, त्वष्ट्वा ger.

त्वङ्ग् 1 P. गतौ कम्पने च to go, to shake; त्वङ्गति pre. तत्वङ्ग perf. त्वङ्गिता p. fut. अत्वङ्गीत् aor.

त्वच् 6 P. संवरणे to cover; त्वचति pre. तत्वाच perf. त्वचिता p. fut. अत्वचीत्, अत्वाचीत् aor.

त्वञ्च् 1 P. to go, to move; त्वञ्चति pre. तत्वञ्च perf. त्वञ्चिता p. fut. अत्वञ्चीत् aor. त्वच्यात् ben. तित्वञ्चिषति des. Pass.—त्वच्यते.

त्वर् 1 A. संभ्रमे to hurry, to move with speed; त्वरते pre. तत्वरे perf. त्वरिता p. fut. अत्वरिष्ट aor. त्वरिषीष्ट ben. तित्वरिषते des. त्वरित or तूर्ण p. p. Cau.—त्वरयति-ते pre. अतत्वरत्-त aor.

त्विष् 1 U. दीप्तौ to shine, to glitter; त्वेषति-ते pre. तित्वेष, तित्विषे perf. त्वेष्टा p. fut. त्वेक्ष्यति-ते fut. अत्वेक्ष्यत्-त con. अत्विक्षत्-त aor. तित्विक्षति-ते des.

त्सर् 1 P. छद्मगतौ to proceed with fraud; त्सरति pre. तत्सार perf. त्सरिता p. fut. अत्सारीत् aor.

थ—

थुड् 6 P. संवरणे (कुटादि) to cover, to hide; थुडति pre. तुथोड perf. थुडिता p. fut. अथुडीत् aor.

थुर्व् 1 P. हिंसायां to injure, to hurt; थूर्वति pre. तुथूर्व perf. थूर्विता p. fut. अथूर्वीत् aor.

द—

दंश 1 P. दंशने to bite, to sting; to speak; (भाषायां च) दशति pre. ददंश perf. दंष्टा p. fut. दंक्ष्यति fut. अदांक्षीत् (अदांष्टाम् dual) aor. दश्यात् ben. दिदक्षति des. Pass.—दश्यते, अदंशि aor. दष्ट p. p. दष्टुम् inf. दष्ट्वा ger.

दंश् 10 A. दंशने to bite; दंशयते pre. अददंशत Aor. दिदंशयिषते des Pass.—दंश्यते pre. दंशित p. p.

दंश् 10 U. भाषायां to speak; दंशयति-ते pre. अददंशत्-त Aor.

दक्ष् 1 A. वृद्धौ शीघ्रार्थे (गतिहिंसनयोश्च) to grow, to go in speed, to go, to hurt; दक्षते pre. ददक्षे perf. दक्षिष्यते fut. अदक्षिष्ट Aor.

दघ् 5 P. घातने पालने च to kill, to protect; दघ्नोति pre. ददाघ perf. दघिता p. fut. अदघीत्, अदाघीत्, aor. (Vedic).

दण्ड् 10 U. दण्डनिपातने दमने च to fine, to punish; दण्डयति-ते, दण्डयाञ्चकार-चक्रे. &c. perf. दण्डयिता p. fut. दण्डयिष्यति-ते fut. अददण्डत्-त aor. दण्डयिषीष्ट des. दण्डित p.p.

दद् 1 A. दाने to give; ददते pre. ददे perf. ददिता p. fut. ददिष्यते fut. अददिष्ट aor. ददिषीष्ट ben. दिददिषते des. Cau.—दादयति-ते. pre. अदीददत्-त aor.

दध् 1 A. धारणे to hold, to present; दधते pre. देधे perf. दधिता p. fut. अदधिष्ट aor. दधिषीष्ट ben. दिदधिषते des. Cau.—दाधयति-ते pre. Pass.—दध्यते pre.

दम्भ् 5 P. दम्भने to hurt, to deceive; दभ्नोति pre. ददम्भ perf. दम्भिता p. fut. दम्भिष्यति fut. अदम्भीत् aor. धिप्सति, धीप्सति, दिदम्भिषति des. Pass.—दभ्यते pre. अदम्भि aor. दब्ध p.p. दम्भित्वा-दब्ध्वा ger.

दम्भ् 10 U. प्रेरणे to send; दम्भयति-ते pre. दम्भयाञ्चकार-चक्रे, &c. perf. अददम्भत्-त Aor. दम्भ्यात् दम्भयिषीष्ट ben. Pass.—दम्भ्यते.

दम् 4 P. उपशमे to be tamed: दाम्यति pre. ददाम perf. दमिता p. fut. दमिष्यति fut. अदमिष्यत् con. अदमत् aor. Cau.—दमयते only अदीदमत् aor. Pass.—दम्यते; अदमि, अदामि aor. दमित, दान्त p. p. दमित्वा, दान्त्वा ger.

दय् 1 A. दानगतिरक्षणहिंसादानेषु to give, to be pity, to protect, to injure, to take; दयते pre. दयाञ्चक्रे. &c. perf. दयिता p. fut, दयिष्यते fut. अदयिष्ट aor. दयिषीष्ट ben. दिदयिषते des. दयित p.p.

दरिद्रा 2 P. दुर्गतौ to be poor or needy; दरिद्राति pre. दरिद्राञ्चकार. ददरिद्रौ perf. दरिद्रिता p. fut. अदरिद्रीत्, अदरिद्रासीत् aor. दरिद्र्यात् ben. दिदरिद्रासति, दिदरिद्रिषति des. दरिद्रित p.p.

दल् 1 P. विशरणे to burst open, to expand; दलति pre. ददाल perf. दलिता p. fut. अदालीत् aor. दलित p.p. Cau.—to cut, to tear. दलयति, दालयति pre. दिदलिषति des.

दल 10 U. विदारणे to tear; दालयति pre. अदीदलत्–त Aor.

दस् 4 P. उपक्षये to perish; दस्यति pre. ददास perf. दसिता p. fut. अदसत् aor.

दंश् 1 P. 10 A. दर्शनदंशनयोः to see, to bite; दंशति, दंशयते pre. ददंश, दंशयाञ्चक्रे &c. perf. अदंशीत्, अददंशत Aor.

दंस् 1 P. 10 U. भाषायां to speak; दंसति, दंसयति-ते pre.

दह् 1 P. भस्मीकरणे to burn, to pain; दहति pre. ददाह perf. दग्धा p. fut. धक्ष्यति fut. अधाक्षीत् (अदाग्धाम dual) aor. दह्यात् ben. दिधक्षति des. Cau.-दाहयति-ते pre. अदीदहत्-त aor. Pass.-दह्यते pre. अदाहि aor. दग्ध p.p. दग्ध्वा ger. दग्धुम् inf.

दा 1 P. दाने to give; यच्छति pre. ददौ perf. दाता p. fut. दास्यति fut. अदास्यत् con. अदात् aor. देयात् ben. दित्सति des. Pass.-दीयते pre. अदायि aor. Cau-दापयति-ते pre. अदीदपत्-त aor. दत्त p. p. दत्त्वा ger. दातुम् inf.

दा 2 P. लवने to cut; दाति pre. (for perf. and fut. see above, अदासीत् aor. दायात् ben. दिदासति des. Pass.—दायते. दात p. p.

दा 3 U. दाने to give, to put. ददाति, दत्ते pre. ददौ, ददे perf. दाता p. fut. दास्यति-ते fut. अदास्यत्-त con. अदात्, अदित aor. देयात्, दासीष्ट ben. दित्सति-ते des. दत्त p. p. दत्त्वा ger. दातुम् inf. Pass.-दीयते pre. अदायि aor.

दान् 1 U. खण्डने आर्जवे च to cut, to make straight; दीदांसति-ते pre. दीदांसाञ्चकार-चक्रे &c. perf. अदीदांसीत्, अदीदांसिष्ट Aor. दीदांसिषति-ते des.

दान् 10 U. छेदने to cut. दानयति-ते pre. अदीदनत्-त Aor.

दाय् 1 A. दाने to give; दायते pre. ददाये perf. दायिष्यते fut. अदायिष्ट aor.

दाश् 1 U. दाने to give; दाशति-ते pre. ददाश, ददाशे, perf. अदाशीत्, अदाशिष्ट. aor.

दाश् 5 P. हिंसायां to kill, to injure; दाश्नोति pre. (Vedic).

दास् 1 U. दाने to give; दासति-ते pre. अदासीत्, अदासिष्ट aor.

दिव् 4 P. क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु to play, to sell, to shine, to wish; to conquer, to trifle with, to

H. S. G. 40.

rejoice, to be sleepy, &c; दीव्यति pre. दिदेव perf. देविता p. fut. अदेवीत् aor. दीव्यात् ben. दुद्यूषति, दिदेविषति des. Pass.—दीव्यते pre. Cau.–देवयति–ते pre. अदीदिवत्-त aor. द्यूत or द्यून p. p.

दिव् 1 P. & 10 U. मर्दने to rub; देवति, देवयति–ते pre. दिदेव, देवयाञ्चकार-चक्रे &c. perf. अदेवीत्, अदीदिवत्-त aor.

दिव् 10 A. परिकूजने to cause, to lament; देवयते pre. अदीदिवत Aor.

दिश् 6 U. अतिसर्जने to grant, to allow; दिशति–ते pre. दिदेश, दिदिशे perf. देष्टा p. fut. देक्ष्यति–ते fut. अदेक्ष्यत्–त con. अदिक्षत्–त aor. दिश्यात्, दिक्षीष्ट ben. दिदिक्षति–ते des. Pass.–दिश्यते pre. अदेशि aor. Cau.–देशयति-ते pre. अदीदिशत्–त aor. दिष्ट p. p. देष्टुम् inf. दिष्ट्वा ger.

दिह् 2 U. उपचये to augment, to anoint; देग्धि, दिग्धे pre. दिदेह, दिदिहे perf. देग्धा p. fut. धेक्ष्यति-ते fut. अधेक्ष्यत्-त; con. अधिक्षत्, अधिक्षत, अदिग्ध aor. दिह्यात्, धिक्षीष्ट ben. दिधिक्षति-ते des. Pass.–दिह्यते pre. अदेहि aor. Cau.–देहयति-ते pre. अदीदिहत्-त aor. दिग्ध p. p. दिग्ध्वा ger. देग्धुम् inf.

दी 4 A. क्षये to perish; दीयते pre. दिदीये perf. दाता p. fut. दास्यते fut. अदास्यत con. अदास्त aor. दासीष्ट ben. दिदीषते des. दीन p. p.

दीक्ष् 1 A. मौण्ड्येज्योपनयननियमव्रतादेशेषु to invest with a sacred thread, to dedicate oneself to, to sacrifice, &c.; दीक्षते pre. दिदीक्षे perf. दीक्षिता p. fut. अदीक्षिष्ट aor. Pass.–दीक्ष्यते pre. अदीक्षि aor. Cau.—दीक्षयति-ते pre. अदिदीक्षत्–त aor. दिदीक्षते des. दीक्षित p. p. दीक्षित्वा ger.

दीधी 2 A. दीप्तिदेवनयोः to shine; to appear; दीधीते pre. दीध्याञ्चक्रे perf. दीधिता p. fut. दीधिष्यते fut. अदीधिष्ट Aor. (Vedic.)

दीप् 4 A. दीप्तौ to shine, to bnrn; दीप्यते pre. दिदीपे perf. दीपिता p. fut. अदीपिष्ट, अदीपि aor. दीपिषीष्ट ben. दिदीपिषते des. Cau.–दीपयति-ते pre. अदीदिपत्-त & अदिदीपत्-त aor. Pass.–दीप्यते pre. अदीपि aor. दीप्त p. p.

दु 1 P. to go; दवति pre. (for other forms see the following root.) दून p.p.

दु 5 P. उपतापे to burn, to distress, to give pain; दुनोति pre. दुदाव perf. दोता p. fut. दोष्यति fut. अदोष्यत् con. अदोषीत् aor. दूयात् ben. दुदूषति des. Pass.—दूयते pre. अदावि aor. दूत p. p.

दुःख 10 U. दुःखक्रियाम् to give pain; दुःखयति pre. अदुदुःखत्-त Aor.

दुर्व् 1 P. हिंसायाम् to kill; दूर्वति pre. दुदूर्व perf. दूर्विष्यति fut. अदूर्वीत् aor.

दुल् 10 U. उत्क्षेपे to shake to and fro; दोलयाति-ते pre. दोलयाञ्चकार-चक्रे perf. दोलयिता p. fut. अदूदुलत्-त aor. दुदोलयिषति-ते des.

दुष् 4 P. वैकृत्ये to be wrong. to be impure; दुष्यति pre. दुदोष perf. दोष्टा p. fut. अदोक्ष्यत् con. दोक्ष्यति fut. अदुषत् aor. दुष्यात् ben. Cau.–दूषयति-ते, also दोषयति-ते (to make depraved) pre. अदूदुषत्-त aor. दुदुक्षति des. Pass.–दुष्यते pre. अदोषि aor. दुष्ट p. p.

दुह् 1 P. अर्दने to hurt, to give pain; दोहति pre. दुदोह perf. दोहिष्यति fut. अदुहत्, अदोहीत् aor. दुहित p. p.

दुह् 2 U. प्रपूरणे to milk, to make profit; दोग्धि, दुग्धे pre. दुदोह, दुदुहे perf. दोग्धा p. fut. धोक्ष्यति-ते fut. अधुक्षत्, अधुक्षत & अदुग्ध aor. दुह्यात्, धुक्षिष्ट ben. दुधुक्षति-ते des. Pass.—दुह्यते (also दुग्धे see Pán. III. 1. 89) pre. अदोहि (also अदुग्ध, अधुक्षत) aor. Cau.–दोहयति-ते pre. अदूदुहत्-त aor. दुग्ध p. p. दुग्ध्वा ger. दोग्धुम् inf.

दू 4 A. परितापे to suffer pain, to be sorry; दूयते pre. दुदुवे perf. दविता p. fut. दविष्यते fut. अदविष्यत con. अदविष्ट aor. दिविषीष्ट ben. दुदूषते des. Cau.—दावयति-ते pre. अदूदवत्-त aor. Pass.– दूयते pre. अदावि aor. दून p. p.

दृ 6 A. आदरे to worship, to regard (with आ); द्रियते pre. दद्रे perf. दर्ता p. fut. अदृत aor. दृषीष्ट ben. दिदरिषते des. Pass.— द्रियते pre. अदारि aor. Cau.—दारयति-ते pre. अदीदरत्-त aor. दृत p. p. दृत्वा ger. दर्तुम् inf.

दृप् 4 P. हर्षमोहनयोः to be glad, to be proud; दृप्यति pre. ददर्प perf. दर्पिता, दर्प्ता, द्रप्ता p. fut. दर्पिष्यति, दर्प्स्यति, द्रप्स्यति fut.

अदर्पिष्यत्, अदर्प्स्यत्, अद्रप्स्यत् con. अदृपत, अदर्पीत्, अदार्प्सीत्, अद्राप्सीत्, aor. दृप्यात् ben. दिदर्पिषति or दिदृप्सति des. Cau.—दर्पयति-ते pre. अदीदृपत्-त, अददर्पत्-त aor. दृप्त p.p. दर्पित्वा, दृप्त्वा ger. दर्पितुं, दर्प्तुं, द्रप्तुम् inf.

दृप् 1 P. & 10 U. संदीपने to excite, to kindle; दर्पति, दर्पयति-ते pre. दर्पिता, दर्पयिता p. fut. अदर्पीत्, अदीदर्पत्-त, अददर्पत-त aor. दृप्यात्, दर्प्यात्, दर्पयिषीष्ट ben. दिदर्पिषति, दिदर्पयिषति-ते des. Pass.–दृप्यते, दर्प्यते pre. अदर्पि aor. दृपित, दर्पित p. p.

दृभ् 6 P. ग्रन्थे to string, to put together; दृभति pre. दर्भिष्यति fut. अदर्भीत् aor. Cau.—दर्भयति-ते pre. अदीदृभत्-त, अददर्भत्-त aor. दिदर्भिषति des. दृब्ध p. p. दर्भित्वा ger.

दृभ् 1 P. 10 U. भये संदर्भे च to fear, to string together; दर्भति दर्भयति-ते pre.

दृश् 1 P. प्रेक्षणे to see, to visit, to know; पश्यति pre. ददर्श perf. द्रष्टा p. fut. द्रक्ष्यति fut. अद्रक्ष्यत् con. अदर्शत, अद्राक्षीत् aor. दृश्यात् ben. दिदृक्षते des. Cau.—दर्शयति-ते pre. अदीदृशत्-त अददर्शत्-त aor. दरीदृश्यते, दर्दर्शीति, दर्दर्ष्टि freq. Pass.–दृश्यते pre. अदर्शि aor. दृष्ट p.p. दृष्ट्वा ger. द्रष्टुम् inf.

दृह्, दृंह् 1 P. वृद्धौ to be fixed or firm, to grow; दर्हति or दृंहति pre. ददर्ह or ददृंह perf. दर्हिता or दृंहिता p. fut. अदर्हीत् or अदृंहीत् aor. दृढ (strong) or दृहित, दृंहित p. p.

दृ 1 P. भये to fear; दरति pre. ददार perf. दरि-री-ता p. fut. अदारीत् aor.

दॄ 9 P. विदारणे to tear, to divide; दृणाति pre. ददार perf. दरिता, दरीता p. fut. दरिष्यति, दरीष्यति fut. अदरिष्यत्, अदरीष्यत् con. अदारीत् aor. दीर्यात् ben. दिदरिषति, दिदरीषति. दिदीर्षति des. Cau.—दारयति-ते, (दरयति-ते in the sense of 'to fear'). Pass.–दीर्यते pre. अदारि aor. दीर्ण p. p. दीर्त्वा, विदीर्य ger. दरितुम्, दरीतुम् inf.

दे 1 A. पालने to protect, to cherish, दयते pre. दिग्ये perf. दाता p. fut. अदित aor. दासीष्ट ben. दित्सते des. Pass—दीयते pre. Cau.—दापयति-ते pre. अदीदपत्-त aor. दात p. p.

देव् 1 A. देवने to sport, to lament; देवते pre. दिदेव perf. देविता p. fut. देविष्यते fut. अदेविष्यत con. अदेविष्ट aor. दिदेविषते des. Pass.–देव्यते pre.

दै 1 P. शोधने to purify, to be purified; दायति pre. ददौ perf. दाता p. fut. दास्यति fut. अदास्यत् con. अदासीत् aor. दायात् ben. दिदासति des. Pass.—दायते pre. Cau.—दापयति-ते pre. अदीदपत्-त aor. दात p. p.

दो 4 P. अवखण्डने to cut, to divide, to move; द्यति pre. ददौ perf. दाता p. fut. अदात् or देयात् ben. दित्सति des. Cau.—दापयति-ते pre. दित p. p. दित्वा, अवदाय ger.

द्यु 2 P. अभिगमने to advance towards, to attack; द्यौति pre. दुद्याव perf. द्योता p. fut. द्योष्यति fut. अद्योष्यत् con. अद्यौषीत् aor. दुद्यूषति des. Pass.—द्यूयते pre. अद्यावि aor. Cau.—द्यावयति-ते pre. अदुद्यवत्-त aor. द्युत p. p.

द्युत् 1 A. दीप्तौ to shine; द्योतते pre. दिद्युते perf. द्योतिता p. fut. द्योतिष्यते fut. अद्योतिष्यत con. अद्योतिष्ट, अद्युतत् aor. द्योतिषीष्ट ben. दिद्युतिषते दिद्योतिषते des. Cau.—द्योतयति-ते pre. अदुद्युतत्-त aor. देद्युत्यते, देद्योति freq. द्युतित-द्योतित p. p.

द्यै 1 P. न्यक्करणे to despise; द्यायति pre. द्याता p. fut. अद्यासीत् aor. द्यायात्, द्येयात् Ben.

द्रम् 1 P. गतौ to run; द्रमति pre. दद्राम perf. अद्रमीत् aor.

द्रा 2 P. कुत्सायां गतौ स्वप्ने च to run, to sleep (generally with नि); द्राति pre. दद्रौ perf. द्राता p. fut. द्रास्यति fut. अद्रास्यत् con. अद्रासीत् aor. द्रायात्, द्रेयात् ben. दिद्रासति des. द्राण p. p.

द्राघ् 1 A. सामर्थ्ये, आयामे to be able, to lengthen; द्राघते pre दद्राघे perf. अद्राघिष्ट aor. द्राघिषीष्ट ben.

द्रांक्ष् 1 P. घोरवाशिते to make a discordant sound; द्रांक्षति pre. दद्रांक्ष perf. अद्रांक्षीत् aor.

द्रु 1 P. गतौ to run, to rush, to melt; द्रवति pre. दुद्राव perf. द्रोता p. fut. द्रोष्यति fut. अद्रोष्यत् con. अदुद्रवत् aor. दुद्रूषति des.

Pass.—द्रूयते pre. अद्रावि aor. Cau.—द्रावयति pre. अदिद्रवत् or अदुद्रवत् aor. दोद्रूयते, दोद्रवीति, दोद्रोति freq. द्रुत p. p.

द्रुण् 6 P. गतिहिंसाकौटिल्येषु to kill; to go &c.; द्रुणति pre. दुद्रोण perf. द्रोणिष्यति fut. अद्रोणीत् aor.

द्रुह् 4 P. जिघांसायाम् to bear malice or hatred; द्रुह्यति pre. दुद्रोह (दुद्रोहिथ, दुद्रोढ, दुद्रोग्ध 2nd sing.) perf. द्रोहिता, द्रोग्धा, द्रोढा p. fut. द्रोहिष्यति, ध्रोक्ष्यति fut. अद्रोहिष्यत्, अध्रोक्ष्यत् con. अद्रुहत् aor. दुद्रोहिषति, दुद्रुहिषति; दुध्रुक्षति des. Cau.—द्रोहयति-ते pre. अदुद्रुहत्-त aor. द्रुग्ध or द्रूढ p. p. द्रोहितुं-द्रोग्धुं, द्रोढुं inf. द्रुहित्वा, द्रोहित्वा, द्रुग्ध्वा, द्रुढ्वा ger.

द्रू 9 U. हिंसायाम् to kill, to hurt; द्रूणाति, द्रूणीते pre. दुद्राव, दुद्रुवे perf. द्रविष्यति-ते fut. अद्रावीत्, अद्रविष्ट aor.

द्रेक् 1 A. शब्दोत्साहयोः to sound, to show energy; द्रेकते pre. दिद्रेके perf. द्रेकिष्यते fut. अद्रेकिष्ट aor.

द्रै 1 P. स्वप्ने to sleep (generally with नि); द्रायति pre. दद्रौ perf. अद्रासीत् aor. द्रायात्, द्रेयात् ben.

द्विष् 2 U. अप्रीतौ to hate; द्वेष्टि or द्विष्टे pre. अद्वेट्-ड् (अद्विषन्-षुः 3rd pl.) Imp. दिद्वेष, दिद्विषे perf. द्वेष्टा p. fut. द्वेक्ष्यति-ते fut. अद्वेक्ष्यत्-त con. अद्विक्षत्-त aor. द्विष्यात्, द्विक्षीष्ट ben. दिद्विक्षति-ते des. Cau.—द्वेषयति-ते pre. अदिद्विषत्-त aor. देद्विष्यते, देद्वेष्टि, देद्विषिति freq. Pass.–द्विष्यते pre. अद्वेषि aor. द्विष्ट p. p. द्वेष्टुम् inf.

द्वृ 1 P. संवरणे अङ्गीकृतौ च to cover, to accept; द्वरति pre. दद्वार perf. अद्वार्षीत् aor.

ध—

धक्क् 10 U. नाशने to destroy; धक्कयति-ते pre. धक्कयाञ्चकार—चक्रे. perf. अदधक्कत्-त aor.

धण् 1 P. शब्दे to sound. धणति pre. अधणीत्, अधाणीत् aor.

धन् 1 P. to sound; धनति pre.

धन् (Vedic) 3 P. धान्ये to produce fruit; दधन्ति, दधन्तः, दधनति pre. दधान Perf. धनिष्यति fut.

धन्व् 1 P. गतौ to go; धन्वति pre. दधन्व perf. अधन्वीत् aor.

धा 3 U. धारणपोषणयोर्दाने च to put, to grant, to produce, to bear; दधाति, धत्ते pre. दधौ & दधे perf, धाता p. fut. धास्यति-ते fut. अधास्यत्-त con. अधात्, अधित aor. धेयात्, धासीष्ट ben. धित्सति-ते des. Pass.—धीयते pre. अधायि aor. Cau.—धापयति-ते pre. अदीधपत्-त aor. देधीयते, दाधाति, दाधेति freq. हित p. p. हित्वा, संधाय ger.

धाव् 1 U. गतिशुद्ध्योः to rub, to wash, to cleanse; धावति-ते pre. दधाव & दधावे perf. धाविता p. fut.. धाविष्यति-ते fut. अधाविष्यत्-त con. अधावीत् & अधाविष्ट aor. धाव्यात्, धाविषीष्ट ben. दिधाविषति-ते des. Cau.—धावयति-ते pre. अदीधवत्-त aor. धावीत-धौत p. p. धावित्वा, धौत्वा, प्रधाव्य ger.

धि 6 P. धारणे to have, to hold; धियति pre. दिधाय perf. अधैषीत् aor. दिधिषति des.

धिक्ष् 6 A. संदीपनक्लेशनजीवनेषु to kindle, to be fatigued, to live; धिक्षते pre. दिधिक्षे perf. धिक्षिष्यते fut. अधिक्षिष्ट aor.

धिन्व् 1 P. प्रीणने to delight, to please; धिनोति pre. दिधिन्व perf. धिन्विता p. fut. अधिन्वीत् aor. धिन्व्यात् ben. धिन्वित p. p.

धिष् 3 P. to sound; दिधेष्टि pre. (used in the Vedas).

धी 4 A. आधारे to hold; धीयते pre. दिध्ये perf. धेष्यते fut. अधेष्ट aor. Cau.–धाययति-ते pre. अदीधयत्-त aor. दिधीषते des. धीन p.p.

धु 5 U. कम्पने to shake to excite; धुनोति & धुनुते pre. दुधाव, दुधुवे perf. धोता p. fut. धोष्यति-ते fut. अधोष्यत्-त con. धूयात्, धूषीष्ट ben. अधौषीत् & अधोष्ट aor. दुधूषति-ते des. धुत p. p.

धुक्ष् 1 A. संदीपनक्लेशनजीवनेषु to be kindled, to be weary, to live; धुक्षते pre. दुधुक्षे perf. धुक्षिता p. fut. अधुक्षिष्ट aor. दुधुक्षिषते des. धुक्षित p. p.

धू 1 U. कम्पने & 6 P. विधूनने to shake; धवति-ते, धुवति pre. दुधाव, दुधुवे (दुधुविथ 2nd singular of 6 which is कुटादि) perf.

धविता, धुविता p. fut. धविष्यति-ते, धुविष्यति fut. अधविष्यत्-त, अधुविष्यत् con. अधावीत्, अधविष्ट, अधुवीत्, aor. धूयात्, धविषीष्ट ben. धूत p. p. धवितुं (1) धुवितुम् (6) inf.

धू 5 & 9 U. कम्पने to shake; धूनोति, धूनुते, धुनाति, धुनीते pre. दुधाव, दुधुवे perf. धोता, धविता p. fut. धोष्यति-ते, धविष्यति-ते fut. अधोष्यत्-त अधविष्यत्-त con. अधावीत्, अधविष्ट; अधोष्ट aor. धूयात्; धविषीष्ट, धोषीष्ट ben. दुधूषति-ते des. Cau.—धूनयति; अदूधुनत् aor. Pass.–धूयते pre. अधावि aor. धूत (5) धून (9) p.p.

धू 10. U to shake; धूनयति-ते pre. धूनयाञ्चकार-चक्रे perf. धूनयिष्यति-ते fut. अदूधुनत् aor. धून्यात्, धूनयिषीष्ट ben. Cau.–धूनयति pre. दुधूनयिषति-ते des.

धूप् 1 P. संतापे to heat, to be heated; धूपायति pre. दुधूप, धूपायाञ्चकार perf. धूपिता & धूपायिता p. fut. धूपिष्यति, धूपायिष्यति fut. अधूपिष्यत्, अधूपायिष्यत् con. अधूपीत्, & अधूपायीत् aor. धूप्यात् & धूपाय्यात् ben. Cau—धूपयति-ते, धूपाययति-ते pre. अदुधूपत्-त अदुधूपायत्-त aor. दुधूपिषति; दुधूपायिषति des. Pass—धूप्यते, धूपाय्यते pre. अधूपि, अधूपायि aor. धूपित, धूपायित p. p.

धूप् 10 U. भाषार्थां-दीप्तौ-च to speak, to shine; धूपयति-ते pre. धूपयाञ्चकार-चक्रे &c. perf. धूपयिता p. fut. अदूधुपत्-त aor.

धूर् 4 A. हिंसागत्योः to kill, to go; धूर्यते pre. दुधूरे perf. अधूरिष्ट aor धूर्त p. p.

धृ 1 U. धारणे to hold; धरति-ते pre. दधार, दध्रे (दधर्थ, दध्रिषे 2 sing.) perf. धर्ता p. fut. धरिष्यति-ते fut. अधरिष्यत्-त con. अधार्षीत्–अधृत aor. ध्रियात् & धृषीष्ट ben. दिधीर्षति-ते des. Cau.– धारयति-ते pre. अदीधरत्-त aor. ध्रियते Pass. धृत p.p.

धृ 1 A. अवध्वंसने to destroy; धरते pre. See the above root.

धृ 6 A. अवस्थाने to be, to exist; ध्रियते pre. दिधारिषते des. For other forms see Atm. forms of धृ 1 U. above.

धृ 10 U. धारणे to hold, to bear, to support; धारयति-ते pre. धारयाञ्चकार–चक्रे, &c. perf, धारयिता p. fut. अदीधरत्-त aor. धार्यात्, धारयिषीष्ट ben. दिधारयिषति-ते des. Pass.–धार्यते. अधारि aor.

धृज्, धृञ्ज् 1 P. गतौ to go, to move; धर्जति, धृञ्जति pre. दधर्ज-दधृञ्ज perf. अधर्जीत्-अधृञ्जीत् aor.

धृष् 1 P. to come together, to hurt; धर्षति pre. दधर्ष perf. धर्षित p.p.

धृष् 5 P. प्रागल्भ्ये to be bold, to be confident, to be proud or brave; धृष्णोति pre. दधर्ष perf. धर्षिता p. fut. धर्षिष्यति fut. अधर्षिष्यत् con. अधर्षीत् aor. Cau.—धर्षयति-ते pre. अदीधृषत्-त, अददधर्षत्-त aor. दिधर्षिषति des. धर्षित, धृष्ट (immodest) p. p.

धृष् 1 P. & 10 U. प्रहसने to offend, to insult, to conquer; धर्षति & धर्षयति-ते pre. दधर्ष, धर्षयाञ्चकार-चक्रे perf. अधर्षीत्, अदीधृषत्-त, अददधर्षत्-त aor. धृष्यात्, धर्ष्यात्, धर्षयिषीष्ट ben. दिधर्षिषति, दिधर्षयिषति-ते des.

धॄ 9 P. to become old धृणाति pre. धरि-री-ष्यति fut. अधारीत् aor.

धे 1 P. पाने to suck, to draw away; धयति pre. दधौ perf. धाता p. fut. अधात्, अधासीत्, अदधत् aor. धेयात् ben. धित्सति des. Pass.—धीयते pre. अधायि aor. Cau.—धापयते (Parasm. also, if it does not convey a reflective sense; वत्सान्धापयति पयः) pre. अदीधपत aor. धीत p.p.

धोर् 1 P. गतिचातुर्ये to tread skilfully, to be skilful; धोरति pre. दुधोर perf. अधोरीत् aor.

ध्मा 1 P. शब्दाग्निसंयोगयोः to exhale, to blow, to throw away; धमति pre. दध्मौ perf. ध्माता p. fut. ध्मास्यति fut. अध्मास्यत् con. अध्मासीत् aor. ध्मायात् or ध्मेयात् ben. दिध्मासति des. Pass.—ध्मायते pre. अध्मायि aor. Cau.—ध्मापयति-ते pre. अदिध्मपत्-त aor. ध्मात p.p.

ध्यै 1 P. चिन्तायाम् to think of, to ponder over; ध्यायति pre. दध्यौ perf. ध्याता p. fut. ध्यास्यति fut. अध्यास्यत् con. अध्यासीत् aor. ध्येयात् or ध्यायात् ben. दिध्यासति des. Pass.—ध्यायते pre. अध्यायि aor. Cau.—ध्यापयति-ते pre. अदिध्यपत्-त aor. दाध्यायते, दाध्याति, दाध्येति freq. ध्यात p.p. ध्यात्वा ger. ध्यातुम् inf.

ध्रज् (also ध्रञ्ज्) 1 P. गतौ to go; ध्रजति or ध्रञ्जति pre. दध्राज, दध्रञ्ज perf. अध्रजीत्, अध्राजीत्, अध्राञ्जीत् aor.

ध्रण् 1 P. शब्दे to sound, to beat a drum; ध्रणति pre. दध्राण perf. ध्रणिष्यति fut.; अध्रणीत्, अध्राणीत् aor.

ध्रस् 9 P. उञ्छे to glean; ध्रस्नाति pre. दध्रास perf. ध्रसिष्यति fut. अध्रसीत्, अध्रासीत् aor. ध्रस्त p.p.

ध्रस् 10 U. 1 P. to glean ध्रासयति-ते, ध्रसति pre. ध्रासयाञ्चकार-चक्रे, दध्रास perf. ध्रासयिता, ध्रसिता p. fut. अदिध्रसत्-त, अध्रसीत्, अध्रासीत् aor.

ध्राक्ष् 1 P. to wish, to sound; ध्राक्षति pre.

ध्राघ् 1 A. सामर्थ्ये to be able; ध्राघते pre. दध्राघे perf. अध्राघिष्ट aor.

ध्राड् 1 A. विशरणे to cut, to tear; ध्राडते pre. अध्राडिष्ट Aor.

ध्रिज् 1 P. to go; ध्रेजति pre. ध्रेजिष्यति fut. अध्रेजीत् Aor.

ध्रु 1 P. स्थैर्ये to be firm; ध्रवति pre. दुध्राव perf. ध्रोता p. fut. अध्रौषीत्, aor. दुध्रुषति des.

ध्रु 6 P. (कुटादि) गतिस्थैर्ययोः to go, to be steady; ध्रुवति pre. दुध्राव (दुध्रुविथ, दुध्रुथ 2nd. sing.) perf. ध्रुष्यति fut. अध्रुवीत् Aor.

ध्रुव् (another reading for the above); ध्रुवति pre. दुध्राव (दुध्रुविथ sing.) perf. ध्रुविष्यति fut. अध्रुवीत् Aor.

ध्रै 1 P. तृप्तौ to be pleased or satisfied, ध्रायति pre. दध्रौ perf. अध्रासीत् aor. ध्रा-ध्रे-यात् ben.

ध्वंस् 1 A. अवस्रंसने गतौ च to fall down, to perish; ध्वंसते pre. दध्वंसे perf. ध्वंसिता p. fut. ध्वंसिष्यते fut. अध्वंसिष्यत con. अध्वसत् or अध्वंसिष्ट aor. ध्वंसिषीष्ट ben. दिध्वंसिषते des. Pass.—ध्वस्यते pre. अध्वंसि aor. Cau.—ध्वंसयति-ते pre. ध्वस्त p.p. ध्वंसित्वा, ध्वस्त्वा ger.

ध्वज्, ध्वञ्ज् 1 P. to go. ध्वजति, ध्वञ्जति pre.

ध्वन् 1 P. शब्दे to sound, to echo, to thunder; ध्वनति pre. दध्वान perf. ध्वनिता p. fut. ध्वनिष्यति fut. अध्वनिष्यत् con. अध्वनीत् or अध्वानीत् aor. Cau.—to sound as a bell, ध्वनयति-ते; to utter indistinctly, ध्वानयति-ते; pre. दिध्वनिषति des. ध्वनित, ध्वान्त (darkness) p.p.

ध्वन् 10 U. अव्यक्ते शब्दे to sound indistinctly; ध्वनयति-ते pre. अदध्वनत्-त aor. दिध्वनयिषति-ते des. Pass.—ध्वन्यते pre. अध्वनि aor.

ध्वृ 1 P. मूर्च्छने to kill, to praise, to describe; ध्वरति pre. दध्वार perf. अध्वार्षीत् aor.

न—

नक्क् 10 U. नाशने to perish; नक्कयति-ते pre. अननक्कत्-त aor.

नक्ष् 1 P. to go, to move; नक्षति pre. ननक्ष perf. अनक्षीत् aor.

नख् 1 P. to go; नखति pre. अनखीत्-अनाखीत् aor.

नट् 1 P. नाट्ये to dance, to act; नटति pre. ननाट perf. नटिता p. fut. नटिष्यति fut. अनटिष्यत् con. अनटीत् or अनाटीत् aor. Cau.—नाटयति-ते (प्रनाट०) pre. अनीनटत्-त aor. निनटिषति des. Pass.—नट्यते pre. अनाटि, अनटि aor. नटित p.p.

नट् 10 U. भाषायाम् to speak, to shine; नाटयति-ते pre.

नद् 1 P. अव्यक्ते शब्दे to sound, to thunder; नदति pre. ननाद perf. नदिता p. fut. अनादीत् or अनदीत् aor. Cau.—नादयति-ते pre. अनीनदत्-त aor. निनदिषति des. नदित p.p.

नद् 10 U. to speak, to shine; नादयति-ते pre.

नन्द् 1 P. समृद्धौ to be pleased; to thrive; नन्दति pre. ननन्द perf. नन्दिता p. fut. अनन्दीत् aor. नन्द्यात् ben. निनन्दिषति des. नन्दित p.p. Cau.—नन्दयति-ते pre. Pass.—नन्द्यते pre.

नभ् 1 A. हिंसायामभावेऽपि to kill, to hurt; नभते pre. नेभे perf. अनभत, अनभिष्ट aor.

नम् 1 P. प्रह्वत्वे शब्दे च to salute, to bend, to sound; नमति pre. ननाम perf. नन्ता p. fut. नंस्यति fut. अनंस्यत् con. अनंसीत् aor. नम्यात् ben. निनंसति des. Cau.—नमयति or नामयति pre. अनीनमत्-त aor. Pass.—नम्यते pre. अनामि aor. नत p.p. नत्वा ger. नन्तुम् inf.

नय् 1 A. to go, to protect; नयते pre. नेये perf. अनयिष्ट aor.

नर्द् 1 P. शब्दे to bellow, to roar, to sound; (प्र) नर्दति pre. ननर्द perf. नर्दिता p. fut. नर्दिष्यति fut. अनर्दिष्यत् con. अनर्दीत् aor. निनर्दिषति des. नर्दित p.p.

-नल् 1 P. गन्धे बन्धने च to smell, to bind; नलति pre. ननाल per. नलिष्यति fut. अनालीत् aor.

-नल् 10 U. भाषायाम् to speak; नालयति-ते pre. नालयिष्यति-ते fut. अनीनलत्-त aor.

-नश् 4 P. अदर्शने to be lost, to perish; नश्यति pre. ननाश perf. नशिता or नंष्टा p. fut. नशिष्यति, नंक्ष्यति fut. अनशिष्यत्-अनंक्ष्यत् con. अनशत् aor. नश्यात् ben. निनंक्षति or निनशिषति des. Cau.—नाशयति-ते pre. अनीनशत्-त aor. नष्ट p.p. नष्ट्वा, नंष्ट्वा or नशित्वा ger. नशितुम्, नंष्टुम् inf.

-नह् 4 U. बंधने to tie, to bind; नह्यति-ते pre. ननाह, नेहे perf. नद्धा p. fut. नत्स्यति-ते fut. अनत्स्यत्-त con. अनात्सीत्, अनद्ध aor. नह्यात्, नत्सीष्ट ben. निनत्सति-ते des. Pass.—नह्यते pre. अनाहि aor. Cau.—नाहयति-ते pre. अनीनहत्-त aor. नानह्यते, नानहीति, नानाद्धि freq. नद्ध p.p. नद्ध्वा ger. नद्धुम् inf.

-नाथ् 1 P. याच्ञोपतापैश्वर्याशीःषु to ask, to be master, to harass; नाथति pre. ननाथ perf. नाथिता p. fut. अनाथीत् aor. 1 A. to bless; नाथते pre. ननाथे perf. नाथिता p. fut. अनाथिष्ट aor. नाथित p.p.

-नाध् 1 A. the same as नाथ् A.

-निज् 3 U. शौचपोषणयोः to wash, to be purified, to nourish; नेनेक्ति, नेनिक्ते pre. निनेज, निनिजे perf. नेक्ता p. fut. नेक्ष्यति-ते fut. अनेक्ष्यत्-त con. अनिजत्, अनैक्षीत्, अनिक्त aor. निज्यात्, निक्षीष्ट ben. निनिक्षति-ते des. Pass.—निज्यते pre. अनेजि aor. Cau.—नेजयति-ते pre. अनेनिजत्-त aor. निक्त p.p. निक्त्वा ger.

-निक्ष् 2 A. शुद्धौ to wash, to purify; निङ्क्ते (प्रणिङ्क्ते) pre. निनिक्षे perf. निक्षिष्यते fut अनिक्षिष्ट Aor. निक्षिषीष्ट ben. निनिक्षिषते des. Cau.—निक्षयति-ते pre. Pass.—निक्ष्यते pre. अनिक्षि Aor. निक्षित p.p.

-निन्द् 1 P. कुत्सायाम् to blame, to find fault with, to condemn; निन्दति pre. निनिन्द perf. निन्दिता p. fut. अनिन्दीत् aor. निन्द्यात् ben. निनिन्दिषति des. Cau.—निन्दयति-ते pre. अनिनिन्दत्-त aor. Pass.—निन्द्यते pre. निन्दित p.p.

निद् 1 U. कुत्सासन्निकर्षयोः to blame, to reach; नेदति-ते pre. निनेद, निनिदे perf. अनेदीत्, अनेदिष्ट aor.

निन्व् 1 P. सेचने सेवने च to sprinkle, to eat; निन्वति pre. निनिन्व perf. अनिन्वीत् Aor.

निल् 6 P. (गहने) to become thick; निलति pre. निनेल perf. नेलिष्यति fut. अनेलीत् aor.

निश् 1 P. समाधौ to think, to meditate; नेशति pre. नेशिष्यति fut. अनेशीत् aor.

निष् 1 P. सेचने to sprinkle; नेषति pre. निनेष perf. अनेषीत् Aor.

निष्क् 10 A. परिमाणे to weigh, to measure; निष्कयते pre. निष्कयाञ्चक्रे perf. निष्कयिष्यते fut. अनिनिष्कत Aor.

निंस् 2 A. चुम्बने to kiss; निंस्ते pre. निनिंसे perf. निंसिष्यते fut. अनिंसिष्ट aor.

नी 1 U. प्रापणे to lead, to carry off, to marry, to settle; नयति-ते pre. निनाय-निन्ये perf. नेता p. fut. नेष्यति-ते fut. अनेष्यत्-त con. अनैषीत्, अनेष्ट aor. नीयात्, नेषीष्ट ben. निनीषति-ते des. Pass.—नीयते pre. अनायि aor. Cau.—नाययति-ते pre. अनीनयत्-त aor. नेनीयते, नेनयीति, नेनेति freq. नीत p.p. नीत्वा ger. नेतुम् inf.

नील् 1 P. वर्णे to colour; नीलति pre. अनीलीत् Aor.

नीव् 1 P. स्थौल्ये to become fat, to grow; नीवति pre. निनीव perf. अनीवीत् Aor.

नु 2 P. स्तुतौ to praise, to commend; नौति pre. नुनाव perf. नविता p. fut. नविष्यति fut. अनविष्यत् con. अनावीत् aor. नुनूषति des. Cau.—नावयति-ते pre. अनूनवत्-त Aor. नुनावयिषति-ते des. नुत p.p.

नुद् 6 U. प्रेरणे to push, to incite, to remove, to throw; नुदति-ते pre. नुनोद, नुनुदे perf. नोत्ता p. fut. नोत्स्यति-ते fut. अनोत्स्यत्-त con. अ त्सीत्, अनुत्त aor. नुद्यात्, नुत्सीष्ट ben. नुनुत्सति-ते des. Cau.—नोदयति-ते pre. अनूनुदत्-त aor. Pass.—नुद्यते pre. अनोदि aor. नुत्त or नुन्न p.p.

नू 6 P. स्तुतौ (कुटादिः) to praise; नुवति pre. नुनाव (नुनुविथ 2nd

sing.) perf. नुविता p. fut. नुविष्यति fut. अनुवीत् Aor. नुनूषति des. Cau.—नावयति-ते pre. अनूनवत्-त Aor. नूत p.p. नुवितुम् inf.

नृत् 4 P. गात्रविक्षेपे to dance, to represent on the stage; नृत्यति pre. ननर्त perf. नर्तिता p. fut. अनर्तीत् aor. नृत्यात् ben. निनर्तिषति—निनृत्सति des. Pass.—नृत्यते pre. अनर्ति aor. Cau.—नर्तयते only pre. अनीनृतत, अननर्तत aor. नृत्त p.p.

नॄ 1 & 9 P. नये to carry, to lead; नरति, नृणाति pre. नरिता-नरीता p. fut. नरिष्यति, नरीष्यति fut. अनारीत् Aor. Cau.—नरयति-ते (नये), नारयति-ते (अन्यत्र).

नेष् 1 A. to go, to reach; नेषते pre. निनेषे perf. अनेषिष्ट Aor.

प—

पक्ष् 1 P. & 10 U. परिग्रहे to take, to accept; पक्षति, पक्षयति-ते pre. पक्षिष्यति, पक्षयिष्यति-ते fut. अपक्षीत, अपपक्षत्-त Aor. पिपक्षिषति, पिपक्षयिषति-ते des. Cau.—पक्षयति-ते pre.

पच् 1 U. to cook, to digest; पचति-ते pre. पपाच, पेचे perf. पक्ता p. fut. पक्ष्यति-ते fut. अपक्ष्यत्-त con. अपाक्षीत्, अपक्त aor. पच्यात्, पक्षीष्ट ben. पिपक्षति-ते des. Pass.–पच्यते pre. अपाचि aor. Cau.–पाचयति-ते pre. अपीपचत्-त aor. पक्व p.p.

पञ्च् 1 A. व्यक्तीकरणे to make clear; पञ्चते pre. पपञ्चे perf. पञ्चिष्यते fut. अपञ्चिष्ट Aor.

पञ्च् 10 U. 1 P. विस्तारवचने to spread; पञ्चयति-ते, पञ्चति pre. अपपञ्चत्-त, अपञ्चीत् Aor.

पट् 1 P. to go, to move; पटति pre. पपाट perf. पटिता p. fut. पटिष्यति fut. अपटिष्यत् con. अपटीत् or अपाटीत् aor. Cau.—पाटयति-ते pre. अपीपटत्-त aor. पिपटिषति des.

पट् 10 U. ग्रन्थे to clothe, to envelop; पटयति-ते per. पटयाञ्चकार-चक्रे &c. perf. पटयिता p. fut. अपपटत्-त aor. पिपटयिषति-ते des.

पट् 10 U. भाषायां वेष्टणे च to speak, to cover; पाटयति-ते pre. पाटयिष्यति-ते fut. अपीपटत्-त aor.

पठ् 1 P. व्यक्तायां वाचि लिखिताक्षरवाचने च to read, to study, to describe; पठति pre. पपाठ perf. पठिता p. fut. पठिष्यति fut. अपठिष्यत् con. अपठीत् or अपाठीत् aor. पिपठिषति des. Pass.—पठ्यते pre. अपाठि aor. Cau.—पाठयति-ते pre. अपीपठत्-त aor. पठित p.p. पठित्वा ger. पठितुम् inf.

पण्ड् 1 A. गतौ to go; पण्डते pre. पपण्डे perf. अपण्डिष्ट aor. पण्डित p.p.

पण्ड् 10 U. नाशने to destroy; 1 P. संहतौ च to heap together, to collect; पण्डयति-ते, पण्डति pre.

पण् 1 A. व्यवहारे to bargain, to bet or stake at play; पणते pre. पेणे perf. पणिता p. fut. अपणिष्ट aor. पणिषीष्ट ben. पिपणिषते des. Cau.—पाणयति-ते pre. अपीपणत्-त aor. पणित p.p.

पण् 1 A. (Parasm. with आय्) स्तुतौ to praise; पणायति-पणते pre. पणायांचकार &c. पेणे perf. पणायिता-पणिता. p. fut. पणायिष्यति-पणिष्यते fut. अपणायीत्-अपणिष्ट aor. पणाय्यात्, पणिषीष्ट ben. Cau.— पणाययति-ते, पाणयति-ते pre. अपपणायत्-त, अपीपणत्-त aor. पिपणायिषति, पिपणिषते des. पणायित p.p.

पत् 1 P. to fly, to alight, to fall; पतति pre. पपात perf. पतिता p. fut. पतिष्यति, fut. अपतिष्यत् con. अपप्तत् aor. पत्यात् ben. पित्सति, पिपतिषति des. Pass.—पत्यते pre. अपाति aor. Cau.—पातयति-ते pre. अपीपतत्-त aor. पतीपत्यते, पतीपतीति, पतीपत्ति freq. पतित p.p. पतित्वा ger. पतितुम् inf.

पत् 4 A. ऐश्वर्ये to be master of, to rule; पत्यते pre. पेते perf. अपतिष्ट aor.

पथ् 1 P. to go; पथति pre. पपाथ perf. अपथीत् aor.

पथ् 10 U. प्रक्षेपे to throw, to send; पाथयति-ते pre. अपीपथत्-त aor.

पद् 4 A. गतौ to go; to attain; पद्यते pre. पेदे perf. पत्ता p. fut. पत्स्यते fut. अपत्स्यत con. अपादि aor. पत्सीष्ट ben. पित्सते des. Pass.—पद्यते pre. अपादि aor. Cau.—पादयति-ते pre. अपीपदत् aor. पन्न p.p. पत्त्वा ger. पत्तुम् inf.

पद् 10 A. गतौ to go; पदयते pre. पदयाञ्चक्रे perf. पदयिष्यते fut. अपपदत aor. पिपदयिषते des. Pass.—पद्यते pre. अपादि aor.

पन् 1 A. to praise; पनते, पनायति pre. पेने, पनायाञ्चकार, &c. perf. पनिता, पनायिता p. fut. पनिष्यते, पनायिष्यति fut. अपनिष्ट, अपनायीत् aor. पनिषीष्ट, पनाय्यात् ben. पनित, पनायित p.p.

पन्थ् 10 U. & 1 P. to go; पन्थयति-ते, पन्थति pre. अपपन्थत्-त अपन्थीत् aor.

पय् 1 A. to go, to move; पयते pre. पेये perf. अपयिष्ट aor.

पर्ण् 10 U. हरितभावे to make green; पर्णयति-ते pre. पर्णयाञ्चकार-चक्रे perf. पर्णयिता p. fut; अपपर्णत्-त aor.

पर्द् 1 A. to break wind; पर्दते pre. पपर्दे perf. अपर्दिष्ट aor.

पर्प् 1 P. to go; पर्पति pre. पपर्प perf. अपर्पीत् aor.

